Turkish Online Journal of Qualitative Inquiry (TOJQI)
Volume 11, Issue 4, October 2020: 2406-2409
DOI: 10.53555/tojqi.v11i4.10107

Research Article

# ‘‘अथर्ववेदे अपामार्गसूक्तानि – वैज्ञानिकी समीक्षा’’

Dr. Dilkhushbhai U. Patel[1]*

वैदिकसाहित्ये चतस्रः संहिताः प्रसिद्धाः । तासु अथर्ववेदः अथर्वांगिरसः वेदः नाम्ना प्रसिद्धः । अथर्वणऋषेः सूक्तानि शान्ति प्रधानानि सन्ति । अंगिरसस्य ऋषेः अभिगमः विपरित अस्ति । ब्रह्मविद्या, भैषज्य विद्या, पितृमेधः इत्यादि अनेके विषयाः अथर्ववेदे प्रत्पादिताः सन्ति। अथर्ववेदे भैषज्य सूक्तेषु वनस्पतिनां भैषज्योपयोगः प्राप्यते। मणिरूपेण अपि भैषज्य चिकित्सा निरूपिता अस्ति ।

अजशृगी,अपराजिता,अपामार्ग,अरुन्धती,नीली,दर्भ इत्यादि वनस्पतिनां चिकित्सार्थे उपयोगः प्राप्यते ।

अथर्ववेदे प्रतीकोपचारेण मन्त्रयुक्ता चिकित्सा निरुपिता अस्ति । अत्र शोधपत्रे अपामार्गसूक्तानां भैषज्योपयोगितया चर्चा क्रियते ।

त्रयाणां सूक्तानां शुक्रः ऋषिः वर्तते । अपामार्गो वनस्पतिः देवता अस्ति । त्रिषु सूक्तेषु अष्टौ मंत्राः प्रत्येक सूक्ते प्राप्यन्ते । तत्र अपामार्गस्य विविधाः उपयोगाः निरूपिताः सन्ति ।

अपामार्गशब्दस्य पर्यायाः शिखरी, प्रत्यक पुष्पी, अधःशाल्या, खरमंजरी, मयूरकः, मर्कटी प्राप्यते । अस्य शब्दस्य व्युत्पत्तिः एवं प्राप्यते । अपमृज्यन्ते विनाश्यन्ते छर्दिदप्रभूतयो व्याधयोऽनेन । अनया व्युत्पत्या छर्दिरोगे तस्य प्रभावः सूचितः ।

अन्या व्युत्पत्तिः एवं अस्ति । अपकृष्टः समन्तात् मार्गोऽस्य अपामार्गः अधः शल्यत्वात् । अनेन अपामार्गक्षुपस्य स्वरूपं निरूपितम् । अस्य पुष्पाणि अधः शल्यात्मकानि सन्ति । अपमार्जन्त्यनेन इति व्युत्पत्या अनेकेषु रोगोषु अस्य प्रभावः सूचितः । अपामार्गस्य उत्पत्तिः भुवः उच्चस्थाने भवति । अतः शिखरे भवः शैखरिकः इति उच्यते । मयूर प्रतिकृति त्वात् मयूरकः इति उच्यते। किणिनो व्रणान् जिहीते याति अतः किणीही इति उच्यते । अस्य स्पर्शात् किणोत्पादक त्वात् अपि किणिही इति उच्यते । गुल्मरोगान् नाशयति अतोपि किणीही अस्य नाम तीक्ष्णत्वादि गुणान् प्राप्नोति अतः मर्कटी इति उच्यते । अस्य मञ्जर्यः स्वराः सन्ति अतः खरमंजरी नाम्ना अपि प्रसिद्धोऽयं क्षुपः ।

अथर्ववेदस्य चतुर्थ काण्डस्य सप्तदश सूक्ते अपामार्गं भेषजानाम् ईशः कथितः । अनेकेषु रोगेषु अस्य प्रभावः अतः सहस्र वीर्यं उदितम्।[2] सर्वत्र प्रसारितत्वाद् समह्वयोषधि इति नाम्ना निरूपितः ।[3] रसस्य हरणाय अपि तस्य प्रभावः निरूपितः ।[4] निलोहितत्वात् तस्य द्वौभेदो स्वीकृतौ नीलश्च रोहितश्च ।[5] आम मांसे, कृत्या प्रयोगे, दुःस्वप्ननाशने अस्य प्रभावः अथर्ववेदे स्वीकृतः।[6] अपामार्गस्य प्रयोगः क्षुधतृटनाशनेऽपि स्वीकृतः अतः क्षुधामारं,

---

1* Principal, V.N.S.Bank Ltd. Arts & Commerce College, Vadnagar, Dist- Mehsana, Gujarat, India

2. इशानां त्वा भेषजानामुज्जेषु आ रभामहे । चक्रे सहस्रवीर्यं सर्वस्मा ओषधे त्वा ।। अथर्व.4.17.1

3. सत्यजितं शपथयावनीं सहमाना पुनःसराम् । सर्वाः समह्वयोषधीरितो नः पारयादिति ।। तथैव..4.17-2

4. या शशाप शपनेन याघं मूरमादधे । या रसस्य शरणाय जतमारेभे तोकमत्तु सा ।। तथैव. 4.17.3

5. यां ते चक्रुरामे पात्रे यां चक्रुनीललोहिते । तथैव. 4.17.4 पाद 1,2

6. आमे मांसे कृत्यां यां चक्रुस्तया कृत्याकृतो जही ।।, तथेव 4.17.4 पाद 3,4
द्वौष्वप्न्यं दौर्जीवित्यं रक्षो अभ्व मराय्य । दुर्णाम्नीः सर्वा दुर्वाचस्ता अस्मन्नाशयामसि ।। तथैव 4.17.5

तृष्णामारं इति नामना अस्य प्रभावः निदर्शितः । अनपत्यता निवारणेऽपि अस्य प्रयोगः सूचितः । अपामार्गस्य निर्वचनं द्वयोः मन्त्रयोः दतम् ।[7] इन्द्रिय जयेऽपि तस्य प्रभावः अनुमितः । पुनः सर्वासु औषधिषु विलक्षणा औषधिः इति अष्टमे मन्त्रे उद्घोषितम्।[8]
चतुर्थकाण्स्य अष्टादशसूक्तेऽपि अष्टौ मन्त्राः सन्ति । अत्रापि प्रथमे मन्त्रे अहर्निशं अस्य प्रभावः ज्योतिरुपेण द्योत्तते ।[9] अश्मरी रोगेऽपि अस्य प्रभावः तृतीय मन्त्रे दृश्यते ।[10] अस्य मंजरयः अपि कृत्या निवारणे क्षेत्रीय रोगे च दृश्यते ।[11] अस्य अष्टमे मन्त्रे तदेव निर्वचनं उद्धृतम् ।[12]

चतुर्थ काण्डस्य एकोनविंशतितमे सूक्तेऽपि कृत्यादोषेनिवारणे प्रथम मन्त्र एव प्रभाव उद्घोषितः । अपामार्गस्य सेवनात् सर्वे निर्भयाः भवन्ति ।[13] औषधीनां अपामार्गः अग्रे एव वर्तते । रक्षसं निवारणे अस्य मन्त्रस्य प्रभावः निरूपितः । अथर्ववेदे पिशाचः, गन्धर्वः, रक्षः, अप्सराः इति शब्दाः चिकीत्सा दृष्ट्या निरूपिताः सन्ति । पिशाचः रक्तदोषे प्रभाविणः जन्तवः । गन्धर्वशब्दः गन्धेन प्राणिषु दोषः उत्पाद्यते यथा मत्कुणः, मषकः, लीक्षा आदयः । राक्षसशब्दः मांस दोष उत्पादने रतानां जन्तुनाम् कृते प्रयुज्यते । अप्सरशब्दः जले प्रादुर्भूतानां जन्तूनाम् अर्थे प्रयुक्तः । जलेन एव रोगान् संक्रामन्ति । अतः मांस दोषेषु अपामार्गस्य अत्र प्रयोगः सूचितः ।[14] अयमेव उपयोगः चतुर्थ मन्त्रऽपि निरूपितः ।[15] अतः शाखाः मंजर्यः रोगानां प्रतिषेधाय उपयुज्यन्ते । अत एव उत्तम ।[16] क्षुपस्य स्वरूपं षष्ठसप्तमयोः मन्त्रयोः निरूपितः ।[17] अपामार्गः अन्तिममन्त्रे एवं प्रार्थ्यते यया शतेन सहस्रेण माम् परिपाही माम् रक्षः अपामार्गस्य स्वरूपं विरुद्धाम् श्रेष्ठतमं वर्तते । अतः इन्द्रस्ते वीरुधा पत इति उक्तम् ।[18] शान्तिकर्मेषु अपामार्ग शान्तिः प्रसिद्धा । अपामार्गपञ्चाङ्गानि अत्र अभिषेकाय जलेषु आरोग्याय उपयोज्यते । एषः प्रतीकोपचारः ।

अपामार्गः सर्वत्र प्राप्यते । हस्तत्रय प्रमाणं तस्य विकासः । अन्यतृणैः सह उत्पद्यते । क्षेत्राणां समीपे, मार्गाणां समीपे, वृक्षाणां संनिधौ च सरलतया उत्पद्यते । अपामार्गस्य मूलानि, बीजानि, पत्राणि, पुष्पाणि अपि औषधिरूपेण उपयुज्यन्ते । अपामार्ग क्षार तैलम् अपि चिकित्सासु प्रसिद्धम् । भस्मक रोगेषु अतीव प्रभावकारी अस्ति । इन्द्रियाणां निर्बलता, अनपत्यता, विषहरणेऽपि आयुर्वेद ग्रन्थेषु अपि उपयोगः निदर्शितः । वृश्चिकादीनाम् दंशते अपामार्गस्य पत्राणि आदाय तस्य व्रणे उपयोगः क्रियते । दन्तरोगेष्वपि अस्य शाखायाः दन्तधावने प्रयोगः निदर्शितः । मंजरीणाम् पिष्टः दन्तेषु प्रयोगः क्रियते । अपामार्ग पत्राणां रसेन दन्तपीडा शम्यते । दुर्गन्ध विनश्यति ।

---

7 . क्षुधामारं तृष्णामारमगोतामनपत्यताम् । अपामार्गं त्वया वयं सर्वं तदप मृज्महे ।।
तृष्णामारं क्षुधामारमथो अक्षपराजयम् । अपामार्ग त्वया वयं तदप मृज्महे ।। तथैव 4.17.6,7

8 . अपामार्ग ओषधीनां सर्वासामेक इद्वशी । तेन ते मृज्म आस्थितमथ त्वमगदश्चर ।। तथैव 4.17.8

9 . समं जेयोतिः सूर्येणाह्ना रात्री समावती । कृणोमि सत्यमूतयेऽरसाः सन्तु कृत्वरीः ।। तथैव 4.18.1

10 . अमा कृत्वा पाप्मानं यस्तेनान्यं जिघांसति । अस्मानस्तस्यां दग्धाया बहुलाः फट्करिक्रति ।। अथर्व. 4.18.3

11 .अनयाहमोषध्या सर्वाः कृत्या अदूदुषम् । यां क्षेत्रे चक्रुर्यां गोषु यां वा ते परुषेषु ।।
यश्चकार न शशाक कर्तुं शश्रे पादमङ्गुरिम् । चकार भद्रमस्मभ्यमात्मने तपनं तु सः ।।
अपामार्गोऽप मार्ष्टु क्षेत्रियं शपथश्च यः । अपाह यातुधानीरप सर्वा अराप्यः ।। तथैव. 4.18.5-7

12 . अपमृज्य यातुधानानप सर्वा अराप्यः । अपामार्ग त्वया वयं सर्वं तदप मृज्महे ।। तथेव. 4.18.8

13 . सेनेवैषि त्विषीमती न तत्र भयमस्ति यत्र प्राप्नोष्योषधे ।। तथैव. 4.19.2

14 . अग्रमेष्योषधीनां ज्योतिषेवाभिदीपयन् । उत त्रातासि पाकस्याथो हन्तासि रक्षसः ।। तथैव. 4.19.3

15 . यददो देवा असुरांस्त्वयाग्र निरकुर्वत । ततस्त्वमध्योषधेऽपामार्गो अजायथाः ।। तथैव. 4.19.4

16 . विभिन्दती शतशाखा विभिन्दन्नाम ते पिता । प्रत्यग्वि भिन्धि त्वं तं यो अस्माँ अभिदासति ।। तथैव. 4.19.5

17 . असद्भूम्याः समभवत्तद्यामेति महद् व्यचः । तद्वै ततो विधूपायत्प्रक्कर्तारमृच्छतु ।।
प्रत्यङ् हि संबभूविथ प्रतीतीनफलस्त्वम् । सर्वान्मच्छपथाँ अधि वरीयो यावया वधम् ।। तथैव. 4.19.6-7

18 . शतेन मा परि पाहि सहस्रेणाभि रक्ष मा । इन्द्रस्ते वीरुधां पत उग्र ओज्मानमा दधत् ।। तथैव. 4.19.8

सुखप्रसूत्यर्थ भानुवासरे पुष्य नक्षत्रे श्वेतापामार्गस्य मूलम् आनीय नीलवस्त्रे बध्वा प्रसुतायाः गले अथवा कटिप्रदेशे बन्धनात् सुखप्रसूतिः भवति। मूलस्य पिष्टमपि उपयुज्यते। निःसंतानता निवारणेऽपि अपामार्गस्य प्रयोगः चिकित्सा ग्रन्थे प्राप्यते ।

स्वप्नदोषे अपामार्गस्य मूलानां तृणं शर्करया उपयोगः । मुखरोगेऽपि पत्राणां रसः प्रभावकारी । क्षुधामारीत्वात् अपामार्गः मेदो हरणे उपयुज्यते । अपामार्गस्य बीजानि क्षीरपाकेन प्रयुज्यत्वात् मेदोहरः भवति । भृष्टबीजानां शर्करया पयसा सेवनात् इन्द्रयाणां बलं प्राप्यते । शिररोगेऽपि अपामार्गस्य मूलस्य लेपनात् शिरारोगः नश्यति । शीतज्वरेऽपि अपामार्गस्य पत्राणि गुटिकायां उपयुज्यते । खल्वाटानाम् शिरसु नूतनकेश प्राप्यर्थमपि अपामार्गस्य भस्मनः प्रयोग दृश्यते ।

पामरोगे चर्मरोगे च अपामार्गस्य पञ्चांगं पानीय उत्कलनं कृत्वा यदि स्नाप्यते तदा पाम रोगोऽपि नश्यति ।

अर्धशिरोवेदना रोगे अपामार्ग बीजानां चूर्णं अपि प्रभावकारि । तेन दूषित कफः निर्वायते । अपामार्गस्य रसं तील तैलेन बधिरत्वम् परमौषधि इति निश्चीयते ।

भावमिश्रेः भावप्रकाशे अस्य पर्यायः परिगणिताः ।[19] वर्षाकाले सर्वत्रः प्रादुर्भवति । अस्य मूलं, बीजानि, पञ्चाङ्गानि, क्षारः, पत्राणि च उपयुक्तानि सन्ति । अस्य रसः तिक्तः कटुश्च, उष्णवीर्यः विपाके कटुः । वात्कफयोः प्रकोपे अतीव प्रभावकारी औषधम् । धन्वन्तरि राजनिघंट्वोः अस्य गुणाः एवं प्राप्यन्ते ।[20]

अस्य पत्रेषु विपुलप्रमाणं क्षारः प्राप्यते । अस्य त्रयो भेदाः श्वेतः अपामार्ग, रक्तः अपामार्गः, नीलः अपामार्गः । अथर्ववेदे नीलः अपामार्गस्य स्वरूपं निरुपितम् । श्वेतः अपामार्गः गर्भदोषनिवारणे सुखप्रसूतौ उपकारी ।

चरकेण शिरोविरोचने अस्य पुष्पाणां प्रयोगः निदर्शितः ।[21]

सुश्रुतेन अर्श रोगे अपामार्गस्य मूलस्य तण्डुलोदकेन सक्षौद्रः प्रयोगः परिगणितः । कृमि रोगेषु अस्य रसं क्षौद्रयुतं पिबेत् इति सुश्रुतेन निर्दशितम् ।[22]

वाग्भटेन अश्मरिरोगे अविमूत्रेण अस्य क्षारपानेन अश्मरिरोगः नश्यति ।[23] सोढलेन विषम ज्वरे अस्य प्रयोग सूचितः ।[24] शिरोरूजायाम् ,[25] नेत्रोत्पीडायाम्,[26] सद्योव्रणेषु अस्य प्रयोगः सुचितः ।[27] राजमार्तण्डे रक्तशोधने शस्त्रधाते च प्रयोगः निदर्शितः ।[28]

---

19. अपामार्गस्तु शिखरी हृयः शल्यो मयूरकः । मर्कटी दुग्रहा चापि किणिही खरमंजरी ।। भावप्रकाश

20. अपामार्गस्तु तिक्तोष्णः कटुश्च कफनाशनः । अर्शःकण्डूदरामघ्नो रक्तहद्ग्राही वान्तिकृत् ।।
 रक्तापामार्गस्कः शीतः कटुकः कफवातनुत् । व्रणकण्डूविषघ्नश्च संग्राही वान्तिकृत् परः ।। ध.नि.रा.नि.

21. प्रत्यक् पुष्पी शिरोविरेचनानाम् । सू. 25.33

22. अपामार्ग मूलश्च तण्डूलोदकेन सक्षौद्रमहरहः ।। चि. 6.13

23. क्षारः पेयोविमूत्रेण शर्कराश्ममरीषु च ।। चि. 11.31

24. अपामार्गस्य मूलं तु प्रातरक्षालिताननः । विषमज्वरनाशाय बध्नियाद्वामपाणिना ।। ज्वराधिकारे पृ.639

25. ...तैलमभ्यंगात् । शिरसो रुजः समग्रा यदि वाऽपामार्गफलसिद्धम् । तथैव. पृ. 417

26. अपामार्गशिफा घृष्टा मधुना सैन्धवेन च । ताम्रपात्रे भृता नेत्रे हन्ति पीडां तदुद्भवाम् । तथैव. पृ. 474

27. अपामार्गस्य संसिक्तं पत्रोत्थेन रसेन तु । सद्योव्रणेषु रक्तं हि प्रवृत्तं परितिष्टति ।। गदनिग्रह, पृ. 532

28. निष्पीडितैः करपुटेन मयुरकस्य पत्रैर्विनिःसरति यः स्वरसोऽतिसान्द्रः । तत्पूरिते सततवेगमपि क्षणेन रक्तं निरूद्धमवतिष्टति शस्त्रघाते ।। राजमार्तण्ड, पृ.25 तथा गदनिग्रह, पृ. 535

सुखप्रसूतौ गर्भधारणे पुत्रप्रसवार्थं योनिशूलेश्च राजमार्तण्डे प्रयोगाः निदर्शिताः ।[29] मूत्रकृञ्छ्ररोगेऽपि वैध मनोरमायां प्रयोगः सूचितः ।[30] एवं अपामार्ग महत् उपकारी औषधम् अस्ति ।

अपामार्गस्य पत्राणि गणेशाय अति प्रियाणि सन्ति । एतदपि तस्य रोगविनाशकारी प्रभावः सूचयति । उत्तरप्रदेशे अलीगढ, बदायु, बुलंदशहर, फरुखाबाद इत्यादिप्रदेशेषु ग्रामजनेः परंपरया अपामार्गस्य विशेषतः स्त्री रोगेषु अनपत्यतायां इन्द्रिय बलार्थं उपयोगः क्रियते । विज्ञान क्षेत्रे अपामार्ग प्रयोगाः मूषकेषु, शशकेषु अपि कृता सन्ति । यैः सिद्धते अस्य रोगेशु प्रभावः । आन्तर्राष्ट्रिय आयुर्वेदः सामायिकेषु संशोधन क्षेत्रे अपामार्गप्रयोगाः प्राप्यन्ते ।

ऋग्वेदे अस्य सन्दर्भः नैव प्राप्यते । यजुर्वेदे दुःस्वप्न नास्यां अस्य प्रयोगः सूचितः । एन दुर्विचाराः स्तभ्यन्ते मनश्च शान्तिम् अनुभवति । अपामार्गस्य चूर्ण रक्षोघ्नं मतम् ।

अपामार्गः Amaranthaceacअस्मिन् वर्गः जातः । अस्य वानस्पतेय नाम Achyranthes aspera अस्ति ।

विभिन्न भाषाषु अपामार्गस्य इमानि नामानि प्राप्यन्ते । अपामार्गस्य भस्मनि लोह तत्त्वं, क्षार तत्त्वं, क्षोराक्षारं , लवणं, सुधा, मज्जा च एवं प्राप्यते । त्रयोदय प्रतिशतं सुधा, चतुः प्रतिशतं लोहतत्वं, त्रिशतः प्रतिशतं क्षारतत्त्वं, सप्तः प्रतिशतं शोराक्षारं, द्विः प्रतिशतं लवणा,द्विः प्रतिशतः गन्धकः, त्रिः प्रतिशतं मज्जा तन्तुषु, उपयुक्तः क्षारः वर्तते । अस्य पत्रेभ्यः अस्य मूलेभ्यः भस्मानि अधिकानि तत्त्वानि प्राप्यते ।

अपामार्गस्य प्रतिछबी दर्शनेन तस्य परिचयं कृत्वा आदाय । सर्वैः प्राप्त रोगेषु यदि उपयोगः क्रियते तदा मे परिश्रम सफलः स्यात् ।

**सन्दर्भ ग्रन्थाः**


1. अथर्ववेदसंहिता
2. चरकसंहिता
3. सुश्रुतसंहिता
4. भावप्रकाश
5. धन्वन्तरी निघंटु
6. राज निघंटु
7. बापालाल वैद्य निघंटु
8. वैद्य मनोरमा
9. वैदिक कृषिविद्या


---

[29] . मूलं पआत्यक्पुष्प्याः पाठायाश्च विनिवेशितं गुह्ये । स्त्रीणां दुष्प्रसवानां प्रसवं कुरुते सुखेनैव । तथैव, पृ.610
शिफां बहिर्शिखायास्तु क्षीरेण परिपेषिताम् । पिबेद्दतुमनि नारी गर्भधारणहेतवे । तथैव, पृ.613
मूलं भुजगारिशिखासमुत्थं दुग्धेन संयुक्तमृतौ निपीतम् । गर्भस्य हेतुः प्रमदाजनस्य....। तथैव, पृ.614
अपामार्ग पत्रद्वयं योनिमध्ये निविष्टं क्षणाद्योनिशूलं निहन्ति । सुदुर्वारमप्येवमेव प्रयुक्तो विदध्यात् ....। तथैव, पृ. 616

[30] . मूत्रकृच्छ्रं जयेत् पीता क्षीरेण शिखरीशिफा । अजाक्षीरेण संपेष्य पीता नीलीजटा तथा । पृ.14